PFF262

# 8. आधुनिकयुगस्य आविष्काराः

## 1. शीतलकं यन्त्रम्

अधुना विज्ञानेन अति उन्नतिः भूता । तेषु शीतलकं यन्त्रं प्रथममस्ति। जनाः अस्य महतीं आवश्यकतां प्रतिगृहम् अनुभवन्ति । ग्रीष्मकाले च अस्य महती उपयोगिता परिलक्ष्यते।



शीतलकयन्त्रम्

## 2. सङ्गणकयन्त्रम्

अस्मिन् युगे संगणकयन्त्रस्य उपयोगः सर्वेषु क्षेत्रेषु दृश्यते । अनेन यन्त्रेण क्रान्तिकारिपरिवर्तनम् अभवत् । अद्य शिक्षाक्षेत्रे अस्य महती आवश्यकता वर्तते । देशविदेशानां समाचारम् इन्टरनेट माध्यमेन प्रेषयितुं समर्थः अयं सङ्गणकः। अधुना सङ्गणकस्य उपयोगिता वर्तते ।



सङ्गणकयन्त्रम्

## 3. वायुयानम्

एतद् वायुयानम् अस्ति । वायुयानं शीघ्रगामि भवति । अति द्रुतगत्याः गगने उड्डयति । जनाः अनेन वायुयानेन दूरस्थानपर्यन्तं शीघ्रं गन्तुं शक्नुवन्ति ।



**वायुयानम्**

## 4. दूरदर्शनम्

सम्पर्कसाधनेषु दूरदर्शनम् अत्याधुनिकसाधनम् अस्ति । प्रतिदिनं वयं नूतनसमाचारं प्राप्नुमः । विविधविषयाणां सूचनां दूरदर्शनं सूचयति यथा - क्रीड़ा-शिक्षा-विज्ञान-कृषि-व्यवसायादीनां विषयाणां समाचारः शीघ्रमेव जनैः प्राप्तुं शक्यते ।



दूरदर्शनम्

## 5. रेडियो यन्त्रम्

रेडियो यन्त्रेण विविध समाचाराः भाषणानि गीतानि च श्रूयन्ते । अस्माभिः अनेन यन्त्रेण अनेके शैक्षिककार्यक्रमाः वैज्ञानिकप्रयोगाः च ज्ञायन्ते ।



रेडियो यन्त्रम्

## 7. चलितदूरभाषयन्त्रम्

एतद् आधुनिकं -चलित - दूरभाष-यन्त्रम् (मोबाईल) येन माध्यमेन कस्मिंश्चिदपि स्थाने विद्यमानाः जनाः स्वमित्रैः सह वार्तालापं कर्तुं शक्नुवन्ति । अस्य यन्त्रस्य ध्वनिः अतिमधुरा प्रतीयते । (जनाः) एतद् यन्त्रं कोटरिकायां स्थापयन्ति । कोटरिकारतः बहि निःसार्य कर्णस्थले आनीय जनैः स्वजनेन, स्वमित्रेण, स्वबन्धुना सह वार्तालापः क्रियते । अस्य यन्त्रस्य उपयोगिता अधुना सर्वेषु क्षेत्रेषु अनवरतं भवति ।



चलित दूरभाष यन्त्रम्

वयं अनेन यन्त्रमाध्यमेन लिखित-संदेशं-अभिनन्दन पत्रं च प्रेषयितुं शक्नुमः । बालक-बालिकाश्च क्रीडन्तः आनन्दमनुभवन्ति । एतद् यन्त्रम् इन्टरनेटमाध्यमेन अभिनन्दनपत्रं, शोकपत्रं, संदेशपत्रं अन्यंमहत्वपूर्ण समाचारं प्रेषयितुं समर्थम् । अधुना अस्य यन्त्रस्य अति उपयोगितास्ति । अतः एतद् यन्त्रंलोकप्रियम् अस्ति ।

## शब्दार्थाः

| | | |
|---|---|---|
| अधुना | - | आजकल |
| प्रतिगृहम् | - | घर-घर में । |
| अनुभवन्ति | - | अनुभव करते हैं । |
| सङ्गणकयन्त्रम् | - | कम्प्यूटर यन्त्र । |
| देशविदेशानाम् | - | देश विदेशों का । |
| प्रेषयितुम् | - | भेजने के लिये । |
| वायुयानम् | - | हवाई जहाज । |
| गगने | - | आकाश में । |
| उड्डयति | - | उड़ता है । |
| शक्नुवन्ति | - | समर्थ होते हैं । |
| प्राप्नुमः | - | प्राप्त करते हैं । |
| सूचयति | - | सूचित करता है । |
| ज्ञायन्ते | - | ज्ञात होते हैं । |
| चलितदूरभाषयंत्रम् | - | चलित टेलीफोन (मोबाईल) |
| कोटरिका | - | जेब (पॉकेट) |
| निःसार्य | - | निकालकर |
| आनीय | - | लाकर |
| वार्तालापः | - | बातचीत |
| क्रियते | - | किया जाता है । |
| अनवरतम् | - | लगातार । |

## अभ्यासः

**1. निम्नलिखित प्रश्नों का संस्कृत में उत्तर दीजिए ।**

1. अधुना केन यन्त्रेण क्रान्तिकारिपरिवर्तनम् अभवत् ?
2. किं यानं गगने द्रुतगत्याः उड्डयति ?
3. दूरदर्शनं किं सूचयति ?
4. अस्माभिः रेडियोयन्त्रेण कानि-कानि श्रूयन्ते ?
5. कस्य यन्त्रस्य ध्वनिः मधुरा प्रतीयते ?

**2. रिक्त स्थान की पूर्ति कीजिए ।**

1. ............. महतीं आवश्यकतां प्रतिगृहम् अनुभवन्ति ।
2. वायुयान् ............. भवति ।
3. विविध विषयानां सूचनां ........... सूचयति ।
4. रेडियो यन्त्रेण ........ श्रूयते ।
5. चलित दूरभाष यन्त्रं ........ स्थापयन्ति ।

**3. युग्म बनाइए-**

| | | | |
|---|---|---|---|
| 1. | चलित दूरभाष यन्त्रम् | - | शीघ्रकार्ययन्त्रम् |
| 2. | सङ्गणक यन्त्रम् | - | दृश्य-श्रव्य यन्त्रम् |
| 3. | रेडियो यन्त्रम् | - | आकाशगामी यन्त्रम् |
| 4. | वायुयानम् | - | श्रवणम् |
| 5. | दूरदर्शनम् | - | श्रव्यभाषण यन्त्रम् |

4. 'इदम्' पुल्लिङ्ग सर्वनाम शब्द की कारक रचना लिखिये।

5. 'भू' (भव्) धातु का लट्लकार परस्मैपद में रूप चलाइये ।

PFNX7P